# Sudarshanamprati Vishnuproktam Shivarchanamahimavarnanam

# सुदर्शनम्प्रति विष्णुप्रोक्तं शिवार्चनमहिमवर्णनम्

## Document Information

Text title : Sudarshanamprati Vishnuproktam Shivarchanamahimavarnanam

File name : sudarshanamprativiShNuproktaMshivArchanamahimavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 50| 45-63||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# सुदर्शनम्प्रति विष्णुप्रोक्तं शिवार्चनमहिमवर्णनम्

(शिवरहस्यान्तर्गते षष्ठांशे / ऋभुगीतान्तर्गते)
वने वा राज्ये वाप्यगपतिसुतानायकमहो
स्फुरल्लिङ्गार्चायां नियममतभावेन मनसा ।
हरं भक्त्या साध्य त्रिभुवनतृणाडम्बरवर-
प्ररूढैर्भाग्यैर्वा न हि खलु स सज्जेत भुवने ॥ ५०.४५॥

न दानैर्योगैर्वा विधिविहितवर्णाश्रमभरै-
रपारैर्वेदान्तप्रतिवचनवाक्यानुसरणैः ।
न मन्येऽहं स्वान्ते भवभजनभावेन मनसा
मुहुर्लिङ्गं शाङ्गं भजति परमानन्दकुहरः ॥ ५०.४६॥

शर्वं परवतनन्दिनीपतिमहानन्दाम्बुधेः पारगा
रागत्यागहृदा विरागपरमा भस्माङ्गरागादराः ।
मारापारशराभिघातरहिता धीरोरुधाररसैः
पारावारमहाघसंसृतिभरं तीर्णाः शिवाभ्यर्चनात् ॥ ५०.४७॥

मार्कण्डेयसुतं पुराऽन्तकभयाद्योऽरक्षदीशो
हरस्तत्पादाम्बुजरागरञ्जितमना नाप्नोति किं वा फलम् ।
तं मृत्युञ्जयमञ्जसा प्रणमतामोजोजिमध्ये जयं
जेतारोतपराजयो (जेतावेत्यपराजितो) जनिजरारोगैर्विमुक्तिं लभेत् ॥ ५०.४८॥

भूतायां भूतनाथं त्वघमतितिलकाकारभिल्लोत्थशल्यैः
धावन्भल्लूकपृष्ठे निशि किल सुमहद्व्याघ्रभीत्याऽरुरोह ।
बिल्वं नल्वप्रभं तच्छदघनमसकृत्पातयामास मूले
निद्रातन्द्रोज्झितोऽसौ मृगगणकलने मूललिङ्गेऽथ शाङ्गे ॥ ५०.४९॥

तेनाभूद्भगवान् गणोत्तमवरो मुक्ताघसङ्घस्तदा
चण्डांशोस्तनयेन पूजितपदः सारूप्यमापेशितुः ।
गङ्गाचन्द्रकलाकपर्दविलसत्भालस्फुलिङ्गोज्ज्वल-

द्वालन्यङ्ककराग्रसङ्गतमहाशूलाहि टङ्कोद्यतः (कण्ठोद्यतः) ॥ ५०.५० ॥

चैत्रे चित्रैः पातकैर्विप्रमुक्तो वैशाखे वै दुःखशाखाविमुक्तः ।
ज्येष्ठे श्रेष्ठो भवतेषाढमासि पुत्रप्राप्तिः श्रावणे श्रान्तिनाशः ॥ ५०.५१ ॥

भाद्रे भद्रो भवते चाश्विने वै अश्वप्राप्तिः कार्तिके कीर्तिलाभः ।
मार्गे मुक्तेर्मार्गमेतल्लभेत पुष्ये पुण्यं माघके चाघनाशः ॥ ५०.५२ ॥

फल्गु त्वंहो फाल्गुने मासि नश्येदीशार्चातो बिल्वपत्रैश्चलिङ्गे ।
एवं तत्तन्मासि पूज्येशलिङ्गं चित्रैः पापैर्विप्रमुक्तो द्विजेन्द्रः ॥ ५०.५३ ॥

दूर्वाङ्कुरैरभिनवैः शशिधामचूडलिङ्गार्चनेन परिशेषयदङ्कुराणि ।
संसारघोरतररूपकराणि सद्यो मुक्त्यङ्कुराणि परिवर्धयतीह धन्यः ॥ ५०.५४ ॥

गोक्षीरेक्षुक्षौद्रखण्डाज्यदध्ना सन्नारेलैः पानसाम्रादिसारैः ।
विश्वेशानं सत्सितारत्नतोयैर्गन्धोदैर्वा सिञ्च्य दोषैर्विमुक्तः ॥ ५०.५५ ॥

लिङ्गं चन्दनलेपसङ्गतमुमाकान्तस्य पश्यन्ति ये
ते संसारभुजङ्गभङ्गपतनानङ्गाङ्गसङ्गोज्झिताः ।
व्यङ्गं सर्वसमर्चनं भगवतः साङ्गं भवेच्छाङ्करं
शङ्गापाङ्गकृपाकटाक्षलहरी तस्मिंश्चिरं तिष्ठति ॥ ५०.५६ ॥

मुरलिसरलिरागैर्मर्दलैस्तालशङ्खैः पटुपटहनिनादध्वान्तसन्धानघोषैः ।
दुन्दुभ्याघातवाद्यैर्वरयुवतिमहानृत्तसंरम्भरङ्गैः
दर्शोष्वादर्शदर्शो भगवति गिरिजानायके मुक्तिहेतुः ॥ ५०.५७ ॥

स्वच्छच्छत्रछवीनां विविधजितमहाच्छायया छन्नमैशं
शीर्षं विच्छिन्नपापो भवति भवहरः पूजकः शम्भुभक्त्या ।
चञ्चच्चन्द्राभकाण्डप्रविलसदमलस्वर्णरत्नाग्रभाभि-
र्दीप्यच्चामरकोटिभिः स्फुटपटघटितैश्चाकचक्यैः पताकैः ॥ ५०.५८ ॥

सम्पश्यारुणभूरुहोत्तमशिखासंलेढितारागणं
तारानाथकलाधरोरुसुमहालिङ्गौघसंसेवितम् ।
बिल्वानां कुलमेतदत्र सुमहापापौघसंहारकृद्वाराणां
निखिलप्रमोदजनकं शम्भोः प्रियं केवलम् ॥ ५०.५९ ॥

अन्नं पोत्रिमलायते धनरसं कौलेयमूत्रायते
संवेशो निगलायते मम सदानन्दो कन्दायते ।
शम्भो ते स्मरणान्तरायभरित प्राणः कृपाणायते ॥ ५०.६० ॥

कः कल्पद्रुमुपेक्ष्य चित्तफलदं तूलादिदानक्षयं
बब्बूलं परिसेवते क्षुदधिको वातूलदानक्षमम् ।
तद्वच्छङ्करकिङ्करो विधिहरिब्रह्मेन्द्रचन्द्रानला-
न्सेवेद्यो विधिवञ्चितः कलिबलप्राचुर्यतो मूढधीः ॥ ५०.६१॥

सुवर्णाण्डोद्भूतस्तुतिगतिसमर्च्याण्डजवर-
प्रणदं (प्रपादं) त्वां कश्चिद्भजति भुवने भक्तिपरमः ।
महाचण्डोद्दण्डप्रकटितभुवं ताण्डवपरं विभुं
सन्तं नित्यं भज भगणनाथामलजटम् ॥ ५०.६२॥

अजगवकर विष्णुबाण शम्भो दुरितहरान्तकनाश पाहि मामनाथम् ।
भवदभयपदाब्जवर्यमेत मम चित्तसरस्तटान्नयातु चाद्य ॥ ५०.६३॥

॥ इति शिवरहस्यान्तर्गते सुदर्शनकृता शिवस्तुतिः सम्पूर्णा ॥

- ॥ श्रीशिवरहस्यम् । शङ्कराख्यः षष्ठांशः । अध्यायः ५०। ४५-६३॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 50. 45-63..

Notes :

There is numbering error in the source text from shloka 43 onwards.

Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.

Selected verses from the text are presented here.

Proofread by Ruma Dewan

*Sudarshanamprati Vishnuproktam Shivarchanamahimavarnanam*

pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*